लक्ष्मीनारायणपंचाग

ना॰पं

१

ॐश्रीगणेशायनमः ॐनमोलक्ष्मीनारायणाय श्रीभै
रवउवाच कैलासोत्तुंगशिखरेरत्नराजिविराजिते क
ल्पद्रुमवनाकीर्णेस्वर्णप्रासादमंडिते पद्मरागशिला
मुक्तामणिमाणिक्यभूषिते वसंतकुसुमामोदगंधवा
हैकवाहिनि नवरत्नशिलाबद्धपीठस्थंपरमेश्वरं देवदे
वंजगन्नाथंपार्वतीसहितंविभुं हसंतंचजपंतंचध्याय

न्तंब्रह्मशाश्वतं पन्नगाभरणोपेतंजटामुकुटमंडितम्
कपालखट्वांगकरंवराभयधरंहरं देवदानवयक्षेंद्र
पिशाचोरगसेवितं गणगंधर्वसिद्धोघनारदार्चित
मव्ययं प्रसन्नवदनंदेवंदेवीहृष्टामहेश्वरम् प्रणम्यो
त्थायसहसावद्धांजलिपुटंशुभः उवाचपार्वतीदीना
शिवंत्रैलोक्यनायकं श्रीदेव्युवाच भगवन्देवदेवेश

ना॰पं
२
2

देवासुरनमस्कृत लांशिवःसर्वलोकेशःसत्यःसच्चित्स्व
रूपकः अनंतःपरमात्मेतित्रिजगत्कारणंप्रभुः उत्पत्ति
स्थितिकृन्नित्यंलयकृद्भुवनेश्वरः अनादिनिधनोदेवः
त्रिगुणात्मापिनिर्गुणः किंतत्परंमहामंत्रंयज्जपस्यय
संततं तत्त्वंश्रोतुमिच्छामित्वत्तोभक्तास्मिकिंकरी
श्रीभैरवउवाच लक्षवारसहस्राणिवारितासिपुनः

पुनः स्त्रीस्वभावान्महादेवि पुनर्मां परिपृच्छसि भक्त्या
नयाप्रसन्नोऽहं तव पार्वति तत्त्वतः एतद्रहस्यं परमं व
क्ष्येगुह्यं दिवौकसां प्रवक्ष्यामिदं तत्त्वं प्रदानत्वं मह
श्वरि नवन्हे हे तव तस्मान्नि न चाख्येयं महात्मभिः यो देव
देवो वरदो लक्ष्मीनारायणः प्रभुः सर्गस्थितिकरो लो
के प्रलयान्तकरो लये स एव परमेशानि देव पन्नगार

नाःपंः
३
3

त्तसो दैत्यकिन्नरयक्षेंद्रमनुजानलपायसो ब्रह्मादि
कीटपर्यंतंजगत्त्रितयकारणं अध्यक्तःसात्विकःस
र्वभूतात्मापरमेश्वरः तस्यदेवस्यपंचांगपटलंपद्ध
तिंशिवे कवचंतत्वस्तंचमंत्रनामसहस्रकम्
स्तोत्रंजपामिदेवेशिस्मरामिमनसासदा पठाम्यहर्नि
शंध्यांतःपरमानन्दकारणम् श्रीदेव्युवाच पंचांगं

देवदेवस्यलक्ष्मीनारायणस्यच श्रोतुमिच्छाम्यहं
नाथवक्त्रमर्हसिसांप्रतं श्रीभैरवउवाच परमार्थप्र
दंदेविपंचांगंसर्वसिद्धिदं वक्ष्यामिपरमेशस्यलक्ष्मी
नारायणस्यते नक्षादौपटलंवक्ष्येमूलविद्यारहस्यकं
मंत्रोद्धारंप्रवक्ष्यामिलक्ष्मीनारायणस्यते श्रेष्ठसिद्धिप्र
दंसद्यःसाधकानांसुदुर्लभं तारंपरांचहरितंपराल.

ना॰ पं॰ क्षीसत्तोभिधं लक्ष्मीनारायणायेतिविश्रुमंत्रेमनुःस्मृ

४ तः नास्यविघ्नोनवादोषोनभीतिर्नविपर्ययः सात्त्वा

५ न्मोत्तमहोमंत्रः सर्वार्थफलदायकः वर्णलक्षणरक्ष

र्योविनायेनास्तिदोषभाक् जीवहीनोयथादेहीसर्वक

र्मसुनक्षमः शुरश्वरणहीनोहिनमंत्रःफलदायकः

वटेरण्येश्मशानेचशून्यागारेचतुष्पथे अर्धरात्रेचम

ध्याक्षेपुरश्चरणमादिशेत् वर्णलक्षंपुरश्चर्यांतदर्धंवा
महेश्वरि एकलक्षावधिंकुर्यान्नातोन्यूनंकदाचन मंत्र
मंगुरुहस्तेनसाधकस्यकरेणवा ततःस्वयंचरेद्धीः
पुरश्चर्याविधानतः जपाद्दशांशतोहोमस्तद्दशांशेनत
र्पणं मार्जनंतद्दशांशेनतद्दशांशेनभोजनं विनाद
शांशहोमेननतत्फलमवाप्नुयात् पंचरत्नेश्वरीविद्यां

ना·पं·
५
5

लक्ष्मीनारायणस्यहि जपेन्मांपंचभिःसाईश्वरस्यर्यफलं
लभेत् अथमंत्रस्यदेवेशिसंस्कारविधिमाचरेत् विधि
नायेनसम्यस्तुसाधकःसिद्धिभाग्भवेत् उत्कीलयेन्मंत्रं
देविततःसंजीवयेत्पुनः विद्यांशापहरींदेविजपेत्स
द्गुरुवक्त्रतः सिद्धंमंत्रंजपेद्देतंपुनःसंपुटितंचरेत् ए
षयोगवरोमंत्रोयोगिनांदुर्लभःकलौ अथोत्कीलनमा

वक्ष्ये मंत्रस्यास्य महेश्वरि परार्णं हरितं भूतिमानामस
कलेपदेत् विश्रांते प्रणवो देवि सकृदुच्चारयेत्सुधीः
मंत्रोत्कीलनमेतत्स्यात्सर्वतन्त्रमयं शिवे मंत्रसंजीव
नं वक्ष्ये शृणु पार्वति सादरं पराविभूतिमातारं नामांते
विश्वमीरितं संजीवनाख्यो गदितो मंत्रराजो महेश्वरि
शिवेन वर्णितां विद्यां शिवे शापहरीं जपेत् वक्ष्यामि त

ना॰पं॰

६

6

बभक्त्याहंतृप्तासर्वार्थदायिनी तारंपरापिदेवेशब्रह्म।
शापंततःपठेत् मोचयेद्दयमुद्धृत्यपरामाठद्वयंजपे
त् विधियंदुर्लभालोकेलक्ष्मीनारायणप्रिया सिद्धंमं
त्रंजपेन्मंत्रीपुनःसंपुटितेचरेत् संपुटस्यमहंवक्ष्येस
र्वागमसमुद्धृतं विश्वमादौमंत्रंपश्चान्नामचांतेजपेत्त्रि
ये संपुटाख्योमंत्रदैविवर्णितोयंफलाप्तये मंत्रस्या।

स्य महादेवि वर्णितो त्र शिवो ऋषिः त्रिष्टुप्छंदो मया
ख्यातं देवतापि समीरिता लक्ष्मीनारायणो देवि बीजं
लक्ष्मीहृदाहृता शक्तिः परा तथा तारं कीलकं समुदा
हृते भोगापवर्गसिद्ध्यर्थे विनियोगः प्रकीर्तितः ध्या
नमस्य प्रवक्ष्यामि लक्ष्मीनारायणस्य ते येनैव ध्यान
मात्रेण लक्ष्मीः सान्निध्यमेष्यति शरदिंदुवदनं पीतव

सनंकमलासनं लक्ष्म्याश्रितंचवन्देहंलक्ष्मीनाराय
णंभजे तारमाभूतिबीजेस्तुषड्दीर्घैस्तैर्महेश्वरि
न्यासंकुर्यात्षडंगादिकरशुद्ध्यादिपूर्वकं यंत्रोद्धारं
प्रवक्ष्यामिसर्वाशासिद्धिदंपरं सर्वसम्मोहनंयन्त्रं
वांछितैकप्रदायकं बिंदुत्रिकोणंवस्वस्रंहृत्ताष्टदल
मंडितं षोडशारंरहसंचभूगृहेनोपशोभितं लक्ष्मीनारायण

स्येतच्छ्रीचक्रंपरमार्थदं लयांगंदेविवक्ष्यामिभोगमो
क्षफलप्रदं वेदागमरहस्याढ्यंपूजाकोटिफलप्रदं
वज्रशक्तिदंडखड्गपाशयष्टिध्वजास्ततः शूलंपूज्याः
शिवेचैतेवाद्वहारिषुसर्वदा इंद्राग्नियममांसादव
रुणानिलवित्तदाः सेश्वराःसायकैःपूज्याब्रह्मानंता
दयस्ततः केशवंमाधवंकृष्णंगोविंदंमधुसूदनम्

ना॰ पं गंगाधरेशं त्र्यंबकं पाणिं चतुर्भुजं पद्माग्रयंके द
८ भारिंहोरदंष्ट्रं जनार्दनं वैकुंठं वामनं चैव पूजयेद्रुद्र
उग्रजं षोडशाग्रेषु देवेशि वामावर्तेन साधकः तत्रा
र्चयेन्महादेवि मंत्रीगुरुचतुष्टयं असितांगं हरुकं तं
वंशीपाणिं च पूजयेत् वृत्तत्रयेषु देवेशि साधको गं
धपुष्पकैः संहारं रुरुकं चंडं भूतेशं कालभैरवम्

कपालं भीषणं चैव तथा श्मशानभैरवं पूजयेत्साध
कः सिद्धो वरूपत्रे महेश्वरि विष्णुं च वासुदेवं च देवि
दामोदरं तथा नृसिंहं च महादेवि देवं संकर्षणं तथा
त्रिविक्रमं चानिरुद्धं विष्वक्सेनं च साधकः लक्ष्मीशङ्खं
कितं देवि वरूकोणे पूजयेत् गंगां च यमुनां चैव ब्र
ह्मेसरस्वतीं तथा पूजयेदग्रवक्त्रीशकमयोगेन पार्वति

ना॰ पं॰ लक्ष्मीनारायणंदेवंप्रजयेद्बिंदुमंडले महालक्ष्मीराज्य
८ लक्ष्मीसिद्धलक्ष्मीवप्रजयेत् शंखंचक्रंगदांपद्मंप्रजये
९ द्बिंदुमंडले गंधाक्षतप्रसूनादिगुरुमाल्यविभूषणैः
संप्रज्यामृतकुंभस्थैर्बिंदुभिर्मंत्रपूजितैः तर्पयेत्साध
कोदेवमकारैःपंचभिःपरं लयोगमेतदाख्यातंप्रयोगा
न्पार्वति वक्ष्येयेनभवेत्सिद्धिर्मंत्रस्यास्यविशेषतः

स्तंभनं मोहनं चैव मारणाकर्षणे ततः वशीकारं तथो
च्चाटं शांतिकं पौष्टिकं तथा एतेषां साधनं वक्ष्ये योगानां
महेश्वरि एषां साधनमात्रेण मंत्रसिद्धिः प्रजायते रवौ
स्नात्वा महादेवि गत्वा श्मशानतरोस्तले जपेदयुतमीशा
नि इन्नेम मन्त्रं दशांशतः हुनमत्स्यांड गुडाज्यैः पुष्पै रानंद
मिश्रितैः स्तंभनं जायते सद्यो वादिवाताकर्षणादिसाम

ना·पं चेदर्धरात्रवेलायां गत्वा शृंगाटकं सुधीः दिशो बद्ध्वासनं
१० शोध्य प्राणायामं विधाय च जपेन्मूलं हरिं ध्यात्वा हुत्वा दे
10 विदशांशतः हुतेनागरपुन्नागकरंजकुसुमानि च त
र्पयित्वा दशांशेन मार्जयित्वा महेश्वरि तद्भस्मनाचरेद्भा
ले तिलकं साधकोत्तमः त्रैलोक्यं सहसा हृष्ट्वा मोहमेष्यति
तन्मुखं भौमे गत्वा श्मशाने च जपेदयुतसंख्यया हुने।

दशांशतो देविसर्पिगोधूमपायसं दूर्वापत्रंसास्वंचम

त्पुष्पाख्रियतेत्क्षणात् क्षुधेगत्वाटवींह्रूंजपेत्फेकांत

देशिवे प्रयुतंमूलमंत्रंचदशनेत्सर्पिर्यवाकणाः दूर्वा

क्षताक्षपद्मात्तपद्मागाणिक्रमसमानिच रंभापिप्परतत्तस्य

सद्यःप्रादुर्भविष्यति शुरोगत्वानदीतीरंजपेन्नचदशां

शतः इनेदाज्येनमधुनाशदीचंद्रकरीरकान् तद्द

ना॰पं स्मनास्साधितेनत्रैलोक्यंवशमेष्यति श्रुक्रेशोकतरुंग
११ त्वाजपेदयुतसंख्यया हुनेत्सर्पिर्नागपदंशालिचूर्णं
तघाकुलं तर्पयेदासवाज्यैस्तरसैर्भक्तादशांशतः
।। शत्रोःशंभुसमानस्यभवेदुच्चाटनंध्रुवं शनौगत्वान
दीतीरंजपेदयुतसंख्यया होमोदशांशतःकार्यस्तथा
यसत्क्रमैः मारणालेर्जंडफलैःशांतिकंजायतेक्षणात्

शुभर्तेशुभवारेवागत्वोपवनमंडलं सोत्सलेसकणांसा
न्नंमहाशुद्धिः प्रजायते एतद्रहस्यंपरमंतत्वमस्मामयो
दितं लक्ष्मीनारायणस्येदंसर्वस्वंपरमार्थदं प्रदात
व्यमभक्तेभ्योदुष्टेभ्योवीरवंदिते महाचीनपदस्येभ्यो
भोगदंमोक्षदंकलौ गोप्यंगुह्यतमंतत्वंगुह्याद्गुह्यत
मंशिवे आनंदकारणंगोप्यंगोपनीयंस्वयोनिवत्

ना॰पं
१२
12

इति श्रीदेवीरहस्ये तंत्रे लक्ष्मीनारायणपटलाख्यानं ना
म षट्त्रिंशः पटलः ३६ श्रीभैरव उवाच अथ ना
देवि वक्ष्येऽहं गद्यपद्यैकरूपिणीं पद्धतिं नित्यशस्त्राया
लक्ष्मीनारायणस्य ते ब्राह्मे मुहूर्ते उत्थाय बद्धपद्मास
नः स्वशिरःस्थसहस्रारयोरुहकमलकर्णिकांतर्गतं
निजगुरुं श्वेतालंकारालंकृतं ध्यात्वा मानसैरुपचारै

रभ्यर्च्य तदग्रेमूलंस्वशाखाजस्यानजपंगुरवेसम
र्प्य तदाज्ञामादायबहिरागत्यहृंमलादिसंत्यज्य
वर्णीकंशौचमादायनद्यादौगत्वा ॐक्लींसर्वजनप्रि
यायकामदेवायनमइतिदंतान्विशोध्य आत्मशुद्धिंकृ
त्वा मत्रयंत्रलेनसंशोध्य मलापकर्षणंस्नानंकृत्वा
मंत्रस्नानंचरेत् तत्रमृदा ॐगांशृंगंगेचयमुनेचैवगो

ना॰पं॰ १२ 13

दावरिसरस्वति नर्मदेसिंधोकावेरिजलेस्मिन्सन्निधिं
कुरु इत्यंकुशमुद्रयावाहमदा ॐमूलं देवेशभक्ति
सलभपरिवारसमन्वित यावत्तोपूजायिष्यामितावद्दे
वत्वहावहेत्यावाहनमुद्राःप्रदर्श्य धेनुयोनिमत्स्यमु
द्राःप्रदर्श्य प्रदमंगेविलिप्य जलेस्मिंश्चविभाव्यम्य
मूलंविलिख्य तन्मूलमुद्दारेशसिरुन्मज्जेत ॥

तत्रसूर्यायार्घ्यत्रयंदद्यात् ॐ ह्रीं हंसः श्रीसूर्यायपव
तेर्घ्यंनमः इत्यर्घ्यत्रयंदत्वा जलादारुह्य वासांसिप
रिधाय देहशुद्धिंविधाय मूलेनऋषिन्यासादिविधा
य मूलं यथाशक्त्याजप्त्वा मलापकर्षणंकुर्यात् वाम
हस्तेजलंधृत्वा दक्षिणहस्तेनाच्छाद्यहंयंरंलंवंइतिसप्त
धाभिमंत्र्य तद्गलितोदकबिंदुभिर्मूलमुच्चरंश्चतुर्दशधा

ना॰पं शिरः प्रोक्ष्यावशिष्टजलंदक्षहस्तेधृत्वा इडयांतर्नीत्वा
१८ पापंप्रक्षाल्य तज्जलंकलुषंवामनासापुटेनबहिरेचयि
त्वा वामभागस्थशिलायामास्फालयेदित्यघमर्षणं
14 ततःसर्वव्यासंविधायगायत्रींजपेत् ॐक्लींलक्ष्मी
नारायणायविद्महे स्लौःपरंब्रह्मधीमहि क्लींश्रींतन्नः
परमात्माप्रचोदयात् ३ इतियथाशक्त्याजप्त्वा श्रीगा

यज्ञासांगायसवाहनाय सपरिछदाय सशक्तिकाय
श्रीलक्ष्मीनारायणायपद्मनेत्रेभ्योनमः इत्यर्घत्रयंदत्वा
प्राणायामत्रयंकृत्वा इडयापिबषोडशभिःपवनंकु
म्भयिश्चतुष्टयमंतरगं त्यजपिंगलयाशनकैःशनकै
र्दशाभिर्दशाभिर्दशाभिर्व्याधिकः इतिप्राणायामत्रयंवि
धाय ॐक्लींआत्मतत्वंशोधयामिस्वाहा ॐक्लींविद्यातत्वं

ना॰प॰ शोधयामिस्वाहा ॐ क्लीं शिवतत्वं शोधयामिस्वाहा त्र
१५ त्वाचम्य पूर्ववत्सूर्यायार्घ्यत्रयं दत्वा देवताकवचे परि
त्वा यथाशक्त्यातर्पणं कुर्यात् श्रीमूलमुच्चार्य श्रीसांग
सवाहनसपरिवारसदेवीकलक्ष्मीनारायणंतर्पयामि
ति त्रिः संतर्प्य मूलविद्यान्तरमुच्चार्यैकैकांजलिनापरि
वारान्संतर्प्य देवर्षिपितृन्संतर्प्य पूर्ववत्सूर्यायार्घ्यत्रयं

दत्वा संहारमुद्रयादेवतांप्रणम्य शर्ववत्सर्यायाछंद
त्वा यागमंडपंप्रविशेदिति संध्याविधिः तत्रपादौप्र
क्षाल्यद्वारमभ्युक्ष्यदेहल्याग्रतश्चतरस्रहस्तमंडलंवि
लिख्य तत्रत्रालितापात्रं संस्थाप्य अस्त्रायफडिति साधा
रेपात्रं संस्थाप्य ॐ हृदयायनमः इति हृन्मंत्रेणार्घ्य ॐ
लक्ष्मीनारायणाय सामान्यार्घ्याय नमः इत्यभ्यर्च्य गंगे

ना॰पं॰
१८
16

तितीर्थमावाह्य धेनुमुद्रां प्रदर्श्य द्वारमभिषेचयेदिति
सामान्यार्घविधिः सर्वे गंगणपतयेनमः वंवटुकायन
मः दक्षे क्षांक्षेत्रपालायनमः पश्चिमे योयोगिनीभ्योन
मः उत्तरे गंगंगायैनमः दक्षे यंयमुनायैनमः वामे संसर
स्वत्यैनमः ऊर्ध्वे अथोदेहल्यामस्त्रायफडितिसंताड्य द्वारदे
वीः संपूज्य द्वारांतः प्रविश्य विहितासनेउपविश्य ॥

मूलेननिरीक्ष्य कवचेनाभ्युक्ष्य अस्त्रायफडितिसंता
ड्य यज्ञामंडपेसंस्थापितेकृत्वा विघ्नशुद्धिंकुर्यात्
ॐआंआसनमंत्रस्य मेरुपृष्ठऋषिः सुतलंछंदः कू
र्मोदेवता आसनशोधनेविनियोगः ह्रींपृथिव्यैनमः
ॐमहित्वयाधृतालोकादेवित्वंविष्णुनाधृता त्वंचधारय
मांलोकेपवित्रंकुरुचासनं ॐआंआधारशक्तिकमला

नाःपं· स्नायनमः अनंतायनमः पद्मायनमः पद्मनालाय
नमः तत्रोपविश्य तालत्रयंदत्वा ॐअपसर्पंतुतेभू
१० तायेभूताभुविसंस्थिताः येभूताविघ्नकर्तारस्तेनश्यंतु
शिवाज्ञया वामपार्ष्णिघाततत्रयेण विघ्नानुत्सार्य ना
राचमुद्रांप्रदर्शयेदित्यासनेसंशोध्य शरुंप्रणामेत्
अखंडमंडलाकारंव्याप्तंयेनचराचरं तत्पदंदर्शितंये

नतस्मैश्रीगुरवेनमः ॐगुरुभ्योनमः परमगुरुभ्योन
मः परापरगुरुभ्योनमः परमेष्ठिगुरुभ्योनमः इति
शिरसिसंपूज्य देवंप्रणम्य ॐक्रीमित्याकुंचेनसुषु
म्णावर्त्मनाप्रदीपकलिकाकारंब्रह्मपर्य्यंतंनीत्वा
परमशिवेनसंयोज्य तयोरैक्यंविभाव्य तदुद्भूतामृत
धारयागुरुक्त्वंतर्प्य पुनस्तेनैवमार्गेणडाकिन्यादिशक्तीः

ना॰पं॰
१८
18

प्रेणयंतीकुंडलिनींस्वपदंप्रापयित्वा वामकुक्षौपाप
पुरुषंअंगुष्ठमात्राकारंकृष्णवर्णंध्यात्वा यंरंलंवंइतिशो
षणदाहनाप्लावनोत्पादनानिकुर्यात् यंवायुबीजे
नषोडशधाजप्तेनशोषयेत् रंवह्निबीजेनचतुःष
ष्टिजप्तेनदाहयेत् वंवरुणबीजेनद्वात्रिंशद्वारज
प्तेनप्लावयेत् लमितिभूबीजेनदशधाजप्तेनशरीरं

पिंडीभूतं विधाय प्राणप्रतिष्ठां कुर्यादिति मंत्रस्तुः
ॐ ह्रीं क्रों यं रं लं वं शं षं सं हं सोहं हंसः हंसः मम प्राणा इ
ह प्राणाः १९ मम जीव इह स्थितः १९ मम सर्वेन्द्रि
याणि मम वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा
इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठाक्र
मः प्राणान्संतर्प्य प्राणायामत्रयं विधाय सर्ववदाच

ना॰पं॰ म्य संकल्पपूर्वेन्यासंकुर्यात् अस्यश्रीलक्ष्मीनारायणपूजा
१९ मंत्रस्य शिवऋषिः त्रिष्टुप्छंदः लक्ष्मीनारायणोदेवता
श्रींबीजं ह्रींशक्तिः ॐकीलकं श्रीभोगापवर्गसिद्ध्यर्थेल
19 क्ष्मीनारायणपूजायांविनियोगः शिवऋषयेनमः
शिरसि त्रिष्टुप्छंदसेनमोमुखे लक्ष्मीनाराय
णोदेवतायैनमो हृदि श्रींबीजायनमो गुह्ये

क्लीं शक्तये नमः पादयोः ॐ कीलकाय नमः सर्वांगेषु
इति विन्यस्य षडंगादिकं कुर्यात् ॐ क्रां श्रां अंगुष्ठाभ्यां नमः
ॐ क्रीं श्रीं तर्जनीभ्यां स्वाहा ॐ क्रूं श्रूं मध्यमाभ्यां वषट्
ॐ क्रैं श्रैं अनामिकाभ्यां हूं ॐ क्रौं श्रौं कनिष्ठिकाभ्यां वौषट्
ॐ क्रः श्रः करतलकरपृष्ठाभ्यां फट् अथ षडंगः ॐ क्रां श्रां
हृदयाय नमः ॐ क्रीं श्रीं शिरसे स्वाहा ॐ क्रूं श्रूं शिखायै

ना॰ पं॰ वषट् ॐ फ्रें श्रें कवचाय हुं ॐ फ्रौं श्रौं नेत्रत्रयाय वौषट्

२॰ फ्रः श्रः अस्त्राय फट् अथ करशुद्धिन्यासः ॐ कामधीन

20 य नमः ॐ गुह्य हृदययोः फ्रीं ज्वालेश्वरपीठाय नमः

तर्जनीशिरसोः ॐ स्रौः पूर्णपीठाय नमः मध्यमाशिखा

योः ॐ स्रौं अवंतीपीठाय नमः कवचाय हुं अनामिक

योः ॐ फ्रीं मधुपुरीपीठाय नमो नेत्रेभ्यो वौषट् कनि

ष्ठयोः ॐश्रीवाराणसीपीठायनमोस्त्रायफट् करत
लपृष्ठयोः इतिकरशुद्धिः अंआंइंईंउंऊंऋंॠंवामपाद
गुल्फांते ऌंॡंएंऐंओंऔंअंअः दक्षपादादिगुल्फांते कं
खंगंघंङं गुल्फादिवामपादमूलांते चंछंजंझंञं गुल्फा
दिदक्षपादमूलांते टंठंडंढंणंनाभ्यादिवामबाहुमूलां
ते तंथंदंधंनंनाभ्यादिदक्षबाहुमूलांते पंफंबंभंमं

कंठादिककरांतं यंरंलंवंस्कंधादिवामकरांतं शंषंसं
हंस्कंधादिदक्षकरांतं लंक्षंःशिरसःपादपर्यंतंइति
विन्यस्येत् अंकंखंगंघंङं·आंअंगुष्ठाभ्यांनमः इंचं
छंजंझंञंईंतर्जनीभ्यांस्वाहा उंटंठंडंढंणंऊंमध्यमा
भ्यांवषट् एंतंथंदंधंनंऐंअनामिकाभ्यांहुं ओंपंफं
बंभंमंऔंकनिष्ठिकाभ्यांवौषट् अंयंरंलंवंशंषंसंहं

लंदाःअःकरतलपृष्ठाभ्यांफट् इतिकरन्यासः एवं
षडंगादिन्यासः अथमातृकान्यासः अंनमःशिरसि
आंनमोमुखवृत्ते इंनमोदक्षनेत्रे ईंनमोवामे उंनमो
दक्षकर्णे ऊंनमोवामे ऋंनमोदक्षनासापुटे ॠंनमो
वामे लृंनमोदक्षगंडे लॄंनमोवामे एंनमोऊर्ध्वोष्ठे
ऐंनमोवामे ओंनमःऊर्ध्वदंतपंक्तौ औंनमःअधोदंतपं

ना॰पं
२२
22

क्षौ अंनमःशिरसि अःनमोमुखे कंखंगंघंङंनमः द
क्षदत्तबाहुसंधिषु टंठंडंढंणंनमोदत्तपादसंधिषु तं
थंदंधंनंनमोवामपादसंधिषु पंनमोदक्षपार्श्वे फंनमो
वामे बंनमःपृष्ठे भंनमोनाभौ मंनमोजठरे यंनमोहृ
दि रंनमोदक्षांसे लंनमःककुदि वंनमोवामांसे शंन
मोहृदादिदक्षहस्तान्तं षंनमोहृदादिवामहस्तान्तं

सं नमो हृदादिदक्षपादाग्रांतं हं नमो हृदादिवामपादा
ग्रांतं लं नमः पादादिशिरःपर्यंतं क्षं नमः शिरसः पाद
पर्यंतं इति विव्यापयेत् ततः ऐं ॐ ऐः इति त्रितांतं न्यसेत्
ऐं क्लीं श्रीमिति त्रितांतं मातृकाःस्थानेषु न्यसेत् ऐं सौः ऐं त्रिता
तं न्यसेत् ऐं क्लीं ऐं त्रितांतं न्यसेत् ऐं श्रीं ऐं त्रितांतं न्यसेत् केव
ले मातृकास्थानेषु मूलं न्यसेदिति षोढान्यासं विधाय

ना०प०
२३
23

मूलमुच्चरन् देहशुद्धिं कृत्वा घटस्त्रां कुर्यात् तत्र सामा
न्यार्घ्यस्य वामे बिंदुषट्कोणवृत्तचतुरस्रं विलिख्य तत्र ॐ
पीठेभ्यो नमः इत्यभ्यर्च्य तत्राधारं संस्थाप्य रं वह्निमं
डलाय दशकलात्मने नमः इत्यत्तैः संपूज्य तत्र श्रीघटं सं
स्थाप्य शंभुनाथ यथा देवि विश्वनाथ यथापुरा ब्रह्मणा
च यथा पूर्वं तथा त्वां स्थापयाम्यहम् इति संस्थाप्य ।

इति संस्थाप्य अं अर्कमंडलाय द्वादशकलात्मने नमः
इति गंधपुष्पैरभ्यर्च्य मूलविलोममातृकया परमामृ
तेनापूर्य सोः सोममंडलाय षोडशकलात्मने नम इ
ति संपूज्य अस्त्राय फडिति कलशे द्रव्यं संताड्य मूलमुच्चर
न्नामृतया निर्गंधं पूर्य तत्र त्रिकोणं विलिख्य मूलं त्रिरिष्ट्वा
मूलेन संपूज्य ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः स्वधे शुक्रशापं मो

ना॰पं॰ चय २ अमृतं स्रावय २ स्वाहा इति द्रव्योपरि दशधा संज
२४ प सूर्यमंडलसंभूते वरुणालयसंभवे अमाबीजमये
24 देवि शुक्रशापाद्विमुच्यतां वेदानां प्रणवो बीजं ब्रह्मानंद
मयं यदि तेन सत्येन ते देवि ब्रह्महत्यां व्यपोहतु पावमा
नः परानंदः पावमानः परो रसः पावमानं परं ज्ञानं तेन त्वां
पावयाम्यहं इति त्रिर्जप्त्वा अं आं इं ईं अमृते अमृतोद्भवे अ

म्रतवर्षिणि अम्रतंस्रावय २ श्रांक्लींअम्रतेस्वैर्येनमइति
द्व्योपरिदशधाजप्त्वा आनंदभैरवभैरव्योध्यात्वा हस
क्षमलवयऊं आनंदभैरवायवौषट् दशधाजपेत्
ऊंसहक्षमलवरयऊं स्वरादेव्यैवौषट् इतिद्व्योपरिदश
धाजप्त्वा तत्रत्रिकोणंविलिख्य ऊंगंगेचयमुनेचैवगो
दावरिसरस्वति नर्मदेसिंधोकावेरिजलेस्मिन्सन्निधिं

ना॰पं॰
२५
25

क्रूं इति तीर्थान्यावाह्य अकारादिषोडशककारादिषो
डशान्तत्र हंलंतं विलिख्य मूलं दशधाजप्त्वा गंधपुष्प
धूपदीपैः संपूज्य मीनमुद्रादिनाशोधयेदिति द्रव्यशु
द्धिः मीनोपरि येनयोनिमत्स्यमुद्राः प्रदर्श्य त्र्यम्बकंय
जामहिसुगंधिंरयपोषणं उर्वारुकमिवबंधनान्मृत्यो
मैक्षीयमामृतात् इति मूलं त्रिर्जप्त्वा मीनं शोधयेत् इति

मीनशुद्धिः मांसोपरिशुद्धात्रयंप्रदर्श्य प्रतद्विष्णुस्तवते
वीर्येणमृगोनभीमःकुचरोगिरिष्ठः यस्योरुषुत्रिषुविक्र
मणेष्वधिक्षियंतिभुवनानिविश्वा मूलंत्रिर्जप्त्वाशोधयेदि
तिमांसशुद्धिः शुद्धोपरिशुद्धांत्रयंप्रदर्श्य तद्विष्णोःपरमंप
दं सदापश्यंतिसूरयः दिवीवचक्षुराततंतद्विप्रासोविप
न्यवोजागृवांसः समिंधतेविष्णोर्यत्परमंपदं इतिमूलंत्रि

ना॰पं॰ र्जम्ना मुद्राखंडमीनमांसादीन् घटे निक्षिप्य चतरस्रं विलि
ख्य स्ववामे साधारं पात्रं गुरोः संस्थाप्य कुलामृतेनापूर्य
२९ मूलेन पूजयेत् ततः स्वभोगपात्रं शक्तिपात्रं योगिनीवीर
26 पात्रमधुपर्कपात्राणि संस्थाप्य कलशामृतेनापूर्य घृत
मधुशर्करादिर्मधुपर्कपात्रे प्रपूरयेत् योगपीठपूजां कु
र्यात् ॐ बिंदुविभूषणत्रिकोणाविराजमानवसुकोणमं

डितहृत्संचितवसुदलविराजितषोडशदलवेष्टितहृत्त
त्रयसंभूषितचतुरस्रंश्रीयंत्रराजंविलिख्यवामतोल्प
श्रीस्वर्णपीठादौनिवेश्य ॡदिसदेवीकंदेवंमानसैरुप
चारैरभ्यर्च्यवाग्भवस्रजांकुर्यात् ॐतत्र ॐऐंक्लींमंडूकायन
मः २ कालाग्निरुद्रायनमः २ मूलप्रकृत्यैनमः २ आधा
रशक्तयेनमः ॐऐंक्लींकूर्मायनमः २ अनंतायनमः २

ना॰पं॰ वराहायनमः २ हरिद्यैनमः २ सुधार्णवायनमः
२० २ मणिमयमंडपायनमः २ अष्टदिक्षुनवरत्नवेदि
२७ भ्यो नमः २ सुवर्णपर्वतायनमः २ नंदनोद्यानायन
मः २ कल्पवनायनमः २ पद्मवनायनमः २ चित्र
रत्नविचितभूमिकायैनमः २ चिंतामणिमंडपायनमः
२ नवरत्नवेदिकायैनमः २ रत्नसिंहासनायनमः २

उच्चैःश्रवसेनत्वजायनमः सर्वादिदित्त २ धर्मज्ञानवैराग्यैश्व
र्येभ्योनमः २ विदित्त २ अधर्माज्ञानवैराग्यानैश्वर्येभ्योन
मः २ संसत्वायनमः २ रंरजसेनमः २ तंतमसेनमः २
ततेभ्योनमः ॐह्रींस्रोःमंत्रवर्णभूषितकर्णिकायैनमः
२ प्रकृतिमयपत्रेभ्योनमः २ विकृतिमयकेसरेभ्योनमः
२ गरुडायनमः २ पंचाशद्वर्णभूषितपद्मासनायनमः

ना॰पं॰ २ मूलं सर्वतत्त्वात्मकाय श्रीयोगपीठाय नमः इति संपूज्य
२८ देवं ध्यात्वा विविंडो ५ष्पगर्भितां बद्धा देवेश भक्ति सुलभ
परिवार समन्वित यावत्त्वां पूजयिष्यामि तावद्देव इहावहे
28 तिष्ठ्यांजलिं क्षिप्त्वा आवाहनादिका मुद्राः प्रदर्श्य मूलं
सांगसदेवीक श्रीलक्ष्मीनारायण देव इहागच्छ २ इह सं
तिष्ठ २ इह सन्निधत्स्व २ मूलं ॐ ह्रीं ह्लौं आं क्रौं क्रों हंसः

लक्ष्मीनारायणप्राणाइहप्राणाः ८ लक्ष्मीनारायणजी
वइहस्थितः ८ लक्ष्मीनारायणसर्वेन्द्रियाणिवाङ्मन
स्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाइहैवागत्यसुखंचिरंति
ष्ठन्तुस्वाहा इतिलेलिहानमुद्रयाप्राणान्दत्वा मूलेनसदे
वीकलक्ष्मीनारायणइदमासनमास्यतां मूलविद्यांतेपा
द्याचमनीयमधुपर्काचमनीयार्घ्यगंधादितत्स्नानालंका

ना॰ पं
२९
29

ररत्नपीठगंधपुष्पाक्षतधूपदीपनैवेद्याचमनीयतांबूल
छत्रचामरारात्रिकानैवेद्यादीन्निवेद्य प्रणम्य मूलेन कल
शामृतेन तत्त्वमुद्रया सांगं सवाहनं सायुधं सपरिच्छदं सदे
वीकं लक्ष्मीनारायणं पूजयामि तर्पयामि नमः इति त्रिः सं
तर्प्य देवाज्ञामादाय परिवारदेवताः पूजयेत् पुष्पांजलिं द
त्वा मूलं महालक्ष्मीश्रीपादुकां पूजयामि तर्पयामि नमः मूलं

राज्यलक्ष्मीश्रीपा॰ मूलं सिद्धलक्ष्मीश्रीपा॰ इतिविंदौप्रथ
मावरणं १ ॐ ह्रीं श्लौं गं गंगाश्रीपा॰ २ यं यमुनाश्री
पा॰ २ सं सरस्वतीश्रीपा॰ २ इतिभ्रप्रेद्वितीयावरणं
२ ॐ ह्रीं श्लौं शंखश्रीपा॰ २ चक्रश्रीपा २ गदाश्रीपा॰
२ पद्मश्रीपा॰ २ इतितृतीयावरणं ३ मूलं लक्ष्मीश्री
विष्णुश्रीपा॰ मूलं लक्ष्मीवासुदेवश्रीपा॰ मूलं लक्ष्मीदा

ना॰पं॰
३॰
30

मोदरश्रीपा॰ ३ मूलंलक्ष्मीनरसिंहश्रीपा॰ ३ मूलंलक्ष्मीसं
कर्षणश्रीपा॰ ३ मूलंलक्ष्मीत्रिविक्रमश्रीपा॰ मूलंलक्ष्मी
अनिरुद्धश्रीपा॰ ३ मूलंलक्ष्मीविश्वक्सेनश्रीपा॰ ३ लक्ष्मी
शङ्खमध्यमेश्रोत्रा[illegible]ष्ठकोणेचतर्थावरणं ४ ॐह्रींश्रीं
महाभैरवश्रीपा॰ ३ रुरुभैरवश्रीपा॰ ३ चंडभैरवश्रीपा॰
३ भूतेशभैरवश्रीपा॰ ३ कालभैरवश्रीपा॰ ३ कपालभै

रवश्रीपा॰ ३ भीषणभैरवश्रीपा॰ ३ श्मशानभैरव
श्रीपा॰ इत्यष्टदलेषु पंचमावरणं ५ ३ आलिंग
श्रीपा॰ ३ हंसकेतुश्रीपा॰ ३ वंशीपाणिश्रीपा॰ ३
परापरगुरुश्रीपा॰ ३ परमेष्ठिगुरुश्रीपा॰ ३ स्वगुरु
श्रीपा॰ ३ परमगुरुश्रीपा॰ ३ इतिवायव्यादिईशानां
तेषुत्रयेषष्ठावरणं ६ ३ केशवश्रीपा॰ माधवश्री॰

ना·पं·
३१
3)

ॐ हृसश्रीपा· ॐ गोविंदश्री· ॐ मधुसूदनश्री· ॐ गदा
धरश्री· ॐ शंखपाणिश्री· ॐ चक्रपाणिश्री· ॐ चतुर्भु
जश्री ॐ पद्मायुधश्री· ॐ कैटभारिश्री· ॐ घोरदंष्ट्र
श्री· ॐ जनार्दनश्री· ॐ वामनश्री· ॐ गरुडध्वजश्री·
इतिषोडशदलेषुसमावरणं ७ ॐ लंइंद्रश्री· ॐ
रंवाह्निश्रीपा· ॐ यंयमश्रीपा· ॐ क्षंनिर्ऋतिश्री· ॐ

वं वरुणश्री· २ यं वायुश्री· २ सं सोमश्री· २ हं ईशा
नश्री· २ ह्रीं अनंतश्री· २ ह्रीं ब्रह्मश्री· २ इत्यभ्यर्च्य
चतुरश्रेष्टमावरणे ८ २ वज्रश्रीपा· २ शक्तिश्रीपा·
२ दंडश्रीपा· २ खड्गश्रीपा· २ पाशश्रीपादुकां· २
यष्टिश्रीपा· २ ध्वजश्रीपा· २ शूलश्रीपा· इतिबाह्यद्वा
रचक्रेषु नवमावरणम् ९ मूलंविरुच्चार्य सांगसवा

हृनेंसाङ्गंसपरिच्छदंसलक्ष्मीकंलक्ष्मीनारायणंदेवंपूज
यामितर्पयामिनमः इतिसंपूज्यत्रिःसंतर्प्ययोनिमुद्रया
प्रणमेत् इतिदशमावरणम् १॰ ततःपुनर्नैवेद्याचमनी
यफलतांबूलादीन्निवेद्य देवाग्रेमालांमूलेनसंपूज्य य
थाशक्त्यामूलंजप्त्वा गुह्यातिगुह्यगोप्त्रीत्वंचेतिदेवायज
पंसमर्प्य तदग्रेकवचसहस्रनामस्तवपाठंकृत्वातदपि

देवीदेवयोः समर्प्य साधकैः सह साधकः पात्रवंदनं

कुर्यात् यावन्नचलते दृष्टिर्यावन्नचलते मनः तावत्पा

नं प्रकर्तव्यं पशुपानमतः परं इति पूर्णपात्रं दत्वा शां

तिस्तोत्रं पठित्वा पुष्पांजलिं दत्वा नानास्तवपाठपूर्वमाह्वाय

कं ईश सदेवीकं देवं श्रापयित्वा पुनर्लक्ष्मत्वमानीय

स्वयमपि लक्ष्मीनारायणाविहितविग्रहो भूत्वा वामतो

ना·पं·
३२
३३

वैसवाचारपारायणः सर्वं विहरेत् इतिसंहारमुद्रया
प्रणमेत् इतिश्रीदेवदेवस्यलक्ष्मीनारायणस्यते पद्ध
तिं नित्यश्रजायावर्णितागोपितंकुरु गुह्यंगोप्यमिदंत
वंश्रज्ञासारंमहेश्वरि गोपयेहेसवः सत्यमित्याज्ञापार
मेश्वरी इतिश्रीदेवीरहस्येतंत्रेलक्ष्मीनारायणपद्धति
वर्णनंनामसप्तत्रिंशः पटलः ३७ ॥

श्रीभैरव उवाच अधुना देवि वक्ष्यामि लक्ष्मीनारायण
स्य ते कवचं मंत्रगर्भं च वज्रपंजरकाख्यया श्रीवज्रपं
जरं नाम कवचं परमाद्भुतं रहस्यं सर्वदेवानां साधका
नां विशेषतः यं धृत्वा भगवान्देवः प्रसीदति परः पुमान्
यस्य धारणमात्रेण ब्रह्मा लोकपितामहः ईश्वरोऽहं शि
वो भीमो वासवोऽपि दिवस्पतिः सूर्यस्तेजोनिधिर्देवि चं

द्मा स्तारकेश्वरः वाशुश्चबलवांलोकेवरुणोयादसां
पतिः कुबेरोपिधनाध्यक्षोधर्मराजोयमोस्मृतः यंधृत्वा
सहस्राक्षिः संहरिष्यतिदानवान् जघानरावणादी
श्चाकिंवक्ष्येहमतःपरं कवचस्यास्यभगेकाधितोयंशु
निःशिवः त्रिष्टुप्छंदोदेवताचलक्ष्मीनारायणोमतः
रमावीजंपराशक्तिःतारंकीलकमीश्वरि भोगापवर्गसि

र्थविनियोगःइतिस्मृतः ॐशांर्गिडवदनंपीतवसनं
कमलासनं लक्ष्म्याश्रितंचतुर्भुजं लक्ष्मीनारायणंभ
जे ॐवासुदेवोवतुमेमस्तकंसशिरोरुहं ह्रींललाटं
सदापातुलक्ष्मीविष्णुसमंततः ह्सौःनेत्रेवताल्लक्ष्मीगो
विंदोजगतांपतिः ह्रींनासांसर्वदापातुलक्ष्मीदामोदरः
प्रभुः श्रींमुखंसततंपातुदेवोलक्ष्मीत्रिविक्रमः लक्ष्मी

ना॰पं॰
३५
35

कं टं सदा पातु स्कंधौ नारायणोवतु यं हस्तौ सर्वदा पातु दे
वो लक्ष्मीजनार्दनः नमः पार्श्वौ सदा पातु लक्ष्म्यानंदैकनं
दनः अं आं इं ईं पातु वक्षो गैं लक्ष्मीत्रिपुरेश्वरः उं ऊं ऋं ॠं पा
तु कुक्षिं क्ष्रीं लक्ष्मीगरुडध्वजः लृं ॡं एं ऐं पातु पृष्ठं हस्तोः ल
क्ष्मीनृसिंहकः ओं औं अं अः पातु नाभिं क्ष्रीं लक्ष्मीविष्टरश्र
वाः कं खं गं घं ङं पातु श्रीलक्ष्मीकैटभांतकः चं छं जं झं

पातुशिरंलक्ष्मीलक्ष्मीश्वरःप्रभुः टंठंडंढंकटिंपातुनारा
यणायनायकः तंथंदंधंपातुचोरूनमोलक्ष्मीजगत्पतिः
पंफंबंभंपातुजानूऐंक्लींलक्ष्मीचतुर्भुजः यंरंलंवंपातुजं
घेस्रौंलक्ष्मीगदाधरः शंषंसंहंपातुगुल्फौक्लींश्रींलक्ष्मीर
थांगभृत् ळंक्षःपादौसदापातुमूलंलक्ष्मीसहस्रपात्
ङंञंणंनंमंमेपातुलक्ष्मीशःसकलंवपुः इंद्रोमांसर्वतः

ना॰पं
३९
36

पातुवाक्रिर्वैक्रोसदातथा यमोमांदक्तिणेपातुनैनृतिंनै
नृत्यांचमां वरुणःपश्चिमेव्यांश्वेवायव्येवतुमांमरुत् उत्त
रेधनदःपायादैशान्यामीश्वरोवतु वज्रशक्तिदंडखङ्गपा
शयष्टिध्वजांकितः सबलःसर्वदापातुदिगीशाःपरमार्थ
दाः अनंतःपातुधोनित्यमूर्ध्वंब्रह्मावतात्त्वमां दशदिक्षुस
दापातुलक्ष्मीनारायणःप्रभुः प्रभातेपातुमांविश्वंमध्या

क्षेवासुदेवकः दामोदरोवतान्मायंनिशादौनरसिंह
कः संकर्षणोर्धरात्रेव्यात्प्रभातेव्याद्विविक्रमः श्रतिह
उः सर्वकालंविष्वक्सेनश्चसर्वतः रणोराजकुलेघ्नेवि
वादेशत्रुसंकटे ॐक्लींक्लौः क्लींश्रींसूलंलक्ष्मीनाराय
णोवतु ॐॐॐरणराजचौरारिघ्नः पायाञ्चमांकेश
वः क्लींक्लींक्लींहहहाक्लौः हसहसौर्वक्षेवंतान्माधवः

ना॰ पं॰
३०
37

क्लीं क्लीं क्लीं जलपर्वताग्रभयतः पायादनंतो विभुः श्रीं श्रीं
श्रीं शं शं शं ललं प्रतिदिनं लक्ष्मीधवः पातु मां इतीदं कव
चं दिव्यं वज्रपंजरकाभिधं लक्ष्मीनारायणस्येष्टं चतुर्व
र्गफलप्रदं सर्वसौभाग्यनिलयं सर्वसारस्वतप्रदं ल
क्ष्मीसंवननं तत्त्वं परमार्थरसायनं मंत्रगर्भं जगत्सारं रह
स्यं त्रिदिवौकसां दशवारं पठेद्धीरो रतांते वैष्णवोत्तमः

स्वमेवरप्रदंपश्येल्लक्ष्मीनारायणंसुधीः त्रिसंध्यंयःपठे
न्नित्यंकवचंमन्त्रबोधितं सयातिपरमंधामवैस्नवंवैस
वोत्तमः महाचीनपदस्थोपियःपठेदात्मचिंतकः प्रा
नेंदघूर्णितःपूर्णंलभेन्नोतंससाधकः गंगाष्टकेनविलि
खेद्वैभूर्जेजपेन्मंत्रं पीतवस्त्रेणसंवेष्ट्यसौवर्णेनाथवे
ष्टयेत् धारयेद्गुटिकांमूर्ध्निलक्ष्मीनारायणंस्मरन् रणेरि

ना.पं.
३८
38

पूर्व्विजित्याशु कल्याणि शूद्रमाविशेत् वंध्या वा काक
वंध्या वा मृतवत्सा च योगना सा वभीयात्कंददेशे लभे
त्पुत्रांश्चिरायुषः गुरूपदेशतो ध्यात्वा गृहे ध्यात्वा त्वां मंत्रं स्मरन्
वर्णलक्षपुरश्चर्याफलमाप्नोति साधकः बहुनोक्तेन किं
देवि कवचस्यास्य पार्वति विनानेन न सिद्धिः स्यान्मंत्रस्या
स्य महेश्वरि सर्वागमरहस्याढ्यं तत्वात्तत्वपरात्परं अभ

क्मायनदातव्यंकुचेलायदुरात्मने दीक्षितायकुलीनाय
स्वशिष्यायमहात्मने महाचीनपदस्थायदातव्यंकवचो
त्तमं गुह्यंगोप्यंमहादेविलक्ष्मीनारायणप्रियं वज्रपंज
रकंवर्मगोपनीयंस्वयोनिवत् इतिश्रीरुद्रयामलेतंत्रे
देवीरहस्येलक्ष्मीनारायणकवचाख्यानेनामाष्टाविंशः
पटलः २८ श्रीभैरवउवाच अथुनाकथयिष्यामिविद्या

ना·पं·
३९
39

नामसहस्रिकं भोगदंमोक्षदंलोकेलक्ष्मीनारायणस्य
ते श्रीदेव्युवाच भगवन्करुणांभोधेलक्ष्मीनारायणस्य
ते भोगापवर्गदंदिव्यंवदनामसहस्रकं सर्वमंत्रमयं
तत्वंसर्वपूजाफलप्रदं सर्वागमरहस्याढ्यंसर्वदैवैकवं
दितं श्रीभैरवउवाच एतद्रहस्यंपरमंमंत्रनामसहस्रकं
लक्ष्मीनारायणस्येष्टंसर्वसंतत्वतोमम गुह्यद्गोप्यतमंदे

विस्वदंधर्मवर्द्धनं लक्ष्मीसंवननंलोकेपरत्रपरमा
र्थदं महाचीनपदस्थानांकौलिकानामभीष्टदं उपपा
तकपापानांशमनंदमकारकं सर्वतीर्थफलोद्रिक्तंस
र्वयज्ञफलप्रदं सर्वदेवस्तुतंसाध्यंचतुर्वर्गफलप्रदम्
अवाच्यंमार्गहीनानामस्माव्यंदुष्टचेतसां वैसवःकौ
लिकश्रेष्ठःपठेन्नामसहस्रकम् गुरूपदेशतोदेविस

ना॰ पे
४॰

र्वसिद्धिमवाप्नुयात् अस्य श्रीलक्ष्मीनारायणनामसहस्र
स्य शिवऋषिः त्रिष्टुप्छंदः श्रीलक्ष्मीनारायणोदेवता
श्रीबीजं ह्रींशक्तिः ॐकीलकं धर्मार्थकाममोक्षार्थेजपेवा
देविनियोगः ॐलक्ष्मीविश्वरीशानोलक्ष्मीकांतोविनायकः वि
श्वंभरोविश्वनाथोविश्वहृद्विश्वसूदनः लक्ष्मीराज्ञोमहा
त्माचपरमात्मापरात्परः ॥

श्रणाराविर्भवोभव्योभवभूतिमयोभवः लक्ष्मीप्रवो
महांलक्ष्मीदेवोलक्ष्मीभवोन्नमः लक्ष्मीपरापरोलक्ष्मी
परापरसमद्युतिः विष्कृतोविकलोव्यग्रोविलासीगीत
वल्लभः विद्याधरप्रियोविद्यावादीविद्याविशारदः पटभ्र
ष्यातलयोतिःपीतपट्टधरोभगः भाग्यवान्भोगदोभार्गोभ्र
गभावविवर्धनः लक्ष्मीकोलेश्वरोलक्ष्मीग्रसोलक्ष्मीविभाव १४

ना॰पं॰
४१
41

सः लक्ष्मीवीरेश्वरो लक्ष्मीधन्यो लक्ष्मीविभाकरः अचिंत्यो
नित्यसंयोगी संयमी यमभीतिहृत् यामिनीशप्रियक
रो राङ्क्षंसी विषापहः धीरो भ्रमहरो भीमो भीमास्यो भीमवल्ल
भः हारीकेकणभूषाढ्यो मौलिमालम्बरार्चितः किंकिणीरव
संतुष्टो वंशीवादनतत्परः स्याणन्नपव्वरगातिश्मारुवक्रोज
यीनयी लक्ष्मीविनयवांल्लक्ष्मीजयवांल्ललिताकृतिः ल

क्ष्मीनेत्रवशीलक्ष्मीहास्यवश्याविनर्तकः नात्मप्रियोनदो
नेदीसर्वभृत्सर्वसारभृत् वासवोगोप्यमार्गेष्टोवैसवाचा
रतत्परः आत्मापरात्माज्ञानात्मालोकाध्यक्षः स्वरेश्वरः स
त्यःसत्यःशुचिर्नित्योनित्यात्मानित्यदर्शनः पंचनादमयो
नंतःपंचमाचारवल्लभः पंचमस्वरसंगीतःकीर्तिदोमोह
नाशनः लक्ष्मीपरःपुमांल्लक्ष्मीशक्तिभृङ्गाकृतोवितः

ना॰पं॰ लक्ष्मीयोगीश्वरो लक्ष्मीयोगदो भोगिनायकः लक्ष्मीलोके
४२ श्वरो लक्ष्मीवक्षा लक्ष्मीमनोहरः अचिन्त्यमहिमाचिन्त्यगरि
42 माघोरनिःस्वनः सर्वोत्सवप्रदो दिव्यरूपो देवेश्वरेश्वरः का
मदेवो वैद्यवैद्यो वेदविद्वेदनायकः ऋग्रूपः सामगीत
ज्ञो यजुर्यज्ञभुजांपतिः याज्ञिको यमिनां त्राता त्रिलोकज
नकोजरः कामप्रदः कामिवरः कमनीयाकृतिः कृतः

लक्ष्मीहृष्टवक्षःस्थितो लक्ष्मीश्रीदः श्रियःपतिः लक्ष्मीकामो
लक्ष्मणेशो लक्ष्मीरामो तिसुंदरः अनिर्वर्ती च निःसंगो नि
र्भयो निरुपद्रवः निराभासो निराधारो निर्लेपो निरहंकृतिः
निराश्रयो निर्गुणश्च गुणातीतो गणेश्वरः ब्रह्मस्वरूपो ब्रह्मज्ञो
ब्रह्महनो ब्रह्मवर्धनः महाक्रतुर्यज्ञवपुर्वराहो यज्ञनाशकः
महारुद्रो महादेवो माधवो मधुसूदनः लक्ष्मीनिरंज।

ना॰पं॰
४३
43

नो लक्ष्मीसिद्धिदः सिद्धिवर्धनः लक्ष्मीश्रीवत्सवक्षाश्च
लक्ष्मीकौस्तुभभूषितः सर्वलोकधरोदांतो दंतिदंता
युधोदमी अप्रमेयगतिः शांतः शमीकामी कृतागमः
महाकर्मा महाचीनो मकारशिवपूजितः वाममार्गरतो
द्विजः सर्वाचारैकमध्यगः मांसाहारी नित्यसंगी मीना
सवरसाकुलः मुद्राप्रियो रत्नानंद रतो रतिपतिप्रियः

अघोरदेवोदैत्यारिर्जितदेवोदिवाकरः निशानाथो
मृतमयोनवग्रहसमर्चितः सत्स्वरूपोविरूपात्मोवि
भाकरशतप्रभः निग्रहोविग्रहीवामोवारांनिधिनिवास
कः पीतवाहुस्थूलपादोदीर्घवक्षरलंभुजः पादामृतक्र
मातीतः सत्यसंधः सनातनः लक्ष्मीसनातनोलक्ष्मीधर्मा
ध्यक्षोधनेश्वरः लक्ष्मीधनप्रदोलक्ष्मीधर्मभागीचधर्मवान्

ना·पं·
४४
44

वीरहापुंडरीकाक्षः पद्मनाभोजगत्प्रभुः पद्मासनोब्रह्म
मयोविस्मयीविगतस्मयः समानःसमदृष्टिश्चविषमो
विषमेक्षणः चतुर्मूर्तिस्त्रिमूर्तिश्चचिंतितःचिंचिणीपतिः
सहस्रबाहुःदेवेशोब्राह्मणोवणिजांपतिः सर्वव्यापीस
र्वसत्वःसर्वमध्यगतःसत्वो शक्रार्चितोनक्रपतिवरुणः
शक्रसोदरः दर्पहासर्पशयनःसर्पाशनवरप्रदः ॥

अमानीमानदोमान्योमानवेंद्रोमनूत्तमः मनुवंश्यो
मराध्यस्तोलक्ष्योलोकैकरत्नकः शोकहाडुर्गमोहमो
वलिहाकलिनाशनः अभंगोमदिरातीवः अभक्तक्ष्वेभना
कृतिः अतिथिस्तिथिनाशश्चनतत्रपरिवेशगः चत्तभोगः
चत्तः श्रोत्रोविश्रवाविलयप्रदः प्रलयांतकरः प्राज्योजननीज
नकप्रियः यशस्वीश्रीधरः शांतः शंकाशातविनाशकः

ना०पं० अक्रूरवरदः क्रूरः कौरवाग्गणनायकः सुवर्णशुक्र
दोमारोमारसूर्माणिभूषणः मांत्रिकोमंजुलोमंत्रीमांत्रि
४५ केष्टवरप्रदः लक्ष्मीवितर्कवांल्लक्ष्मीसुंदरोवंधुरोभयः
45 अजितःसावितस्नातस्नातीयःकार्तवीर्यकः लक्ष्मीपद्म
धरोलक्ष्मीचंद्रहासोविकत्थनः लक्ष्मीगोवर्धनधरोलक्ष्मी
कंठधरोविराट् स्कंदाग्रयोरिपुध्वंसीदेवसेनादिनायकः

अत्युज्वलोज्वलस्वभावमान्सोमसुंदरः तामसःसात्वि
कःसत्वःसोमराजोमरीचिमान् अर्चिष्मान्विकलःकु
ल्याकल्यःसज्जनश्लघकः विराजोवामनोवेणर्वानरोवारि
वाहनः वाल्मीकिवरदोवंदीवंद्योवंधुकसन्निभः वर्णोस्वरो
वर्णमालीवनमाल्यतिसुंदरः भृगुर्भीस्वदृग्भोक्ताकर्ताह
र्ताशतक्रतुः अतल्पःकोमलःकोपीरमणोमणिकुंडलः

ना॰ पं॰
५९
48

लक्ष्मीकेयूरवांल्लक्ष्मीमणिदामविराजितः लक्ष्मीनूपुर
वांल्लक्ष्मीशुक्लामाल्यविभूषणः लक्ष्मीगोधांगुलित्राणोल
क्ष्मीसौवर्णकंकणः लक्ष्मीविराजितोलक्ष्मीविविधाभरणो
ज्ज्वलः ककारादिक्षकारांतविद्याभूषणभूषितः अकाराद्यक्ष
रस्फीतोनिःशेषस्वरमंडितः वर्णमाम्नोमहाविद्यामातृका
क्षरतत्ववान् लक्ष्मीकामेश्वरोलक्ष्मीकाशुकोनिर्जरेश्वरः

कलावान्कीर्तिमान्कुर्न्दः कुंभांडप्राणहारकः केशांतकः
कालसूक्ष्मकारकः कष्टहाकठी क्रोताकुञ्जः कंडुधरः कल
कंदः कुलालकः कुलाध्यक्षः कुलाचारी कुलाकुलपदार्चितः
करंजकः कर्तरीशः कनकः कर्तरीकरः कलंकरहितः को
कः कोकशोकनिर्वहणः कपिलः कलशी कोलः कौलिका
कुलमानसः लक्ष्मीकलाकुललक्ष्मीकुलजः कर्मवर्धनः

ना॰पं
४०
47

लक्ष्मीकाशीश्वरोलक्ष्मीनवनाथविनायकः लक्ष्मीकनिष्ठो
निछिष्ठोलक्ष्मीयोगेंद्रयोगदः खर्परः खेचरः खेटः खगगा
मीखलांतकः खद्रूपः खगनेत्रश्च खनित्रः खेटनायकः ख
गायुधः खंडधारी खंजनेत्रगणभंजनः खरध्वंसी खगारा
वी खर्वखरारावभीषणः शंखलोलाखगगतिः खेचरेश्वर
सेवितः खेचरीगणसेव्यश्च खंडमुद्रानियंत्रितः

खड्गहस्तः खड्गपालः खेटः खर्वणाभ्रघणः लक्ष्मीखेशः
खोकरूपो लक्ष्मीभास्वरमूर्तिमान् लक्ष्मीखद्योतगम्भ्र लक्ष्मी
खेचरः खोषमरीप्रियः लक्ष्मीचिताग्निनिलयो लक्ष्मीभस्मीकृ
तानलः लक्ष्मीधृतिप्रदो लक्ष्मीज्योतिष्मान्नक्षत्रांचितः लक्ष्मीगी
तः स्वरालापी गोपतिर्गोकुलेश्वरः गंगाधरप्रियो गोष्ठीगोपालो
गंधवर्धनः गंधवाहप्रियो गीतो गीतज्ञो गीतलालसः

ना॰पं॰ ४८

48

गुंजाहारप्रियोगंडीगुरुगर्वापहनोगवः गांभीर्यवान्गुरुत
रोगुरुशास्त्रविवर्धनः गुरुभक्तिप्रियोगोलीगंडशैलनि
वासकः गर्जन्नादोगोत्रपातिर्गोलमार्गप्रियोगवान् नि
रंगोगजवक्त्रेशोगणनायकनायकः गंधर्वनाथवरदो
गगनेचरशत्रुजितः गर्भहीनोगर्भवाहीगुणोगुणसाग
रः गुणातीतवपुर्गुणपोग्रममार्गप्रवर्तकः ॥

श्रमसंत्रप्रियोगोप्योत्रसोत्पलकवल्लभः गोपितोगि
रिनाथश्रगिरिधात्रीजगन्निधिः लक्ष्मीप्रियःप्रियःप्रीतो
लक्ष्मीगरुडवाहनः लक्ष्मीकपोतनिलयोलक्ष्मीकल्पद्रु
मोरविः लक्ष्मीसंतानकःसारोलक्ष्मीसारोलतापतिः लक्ष्मी
याक्षोमलक्ष्माचलक्ष्मीसागरनंदनः ह्रीलीह्रणिमयोह्रष्टो
हुस्तणारलईश्वरः ह्रणामयोचहर्ताचह्रणिनाथोध्वर्णभाक्

ना.पं. लक्ष्मीचिंतामणिःसाधुर्लक्ष्मीवीरोवरोत्तमः लक्ष्मीचतुर्भु
४९ जोलक्ष्मीविश्वनाथोविनायकः ऊ.वर्णोऽनंतरूपश्चऊन
न्तोऽनंतरूपवान् ऊ.वर्णरूपोविश्वेशोऊ.कारान्तरमंडनः
49 लक्ष्मीसेव्योनिर्गुणात्मालक्ष्मीशानःशिवार्चितः चारुरूप
श्चारुगतिश्चारुमूर्तिश्चमत्कृतिः चारुनेत्रश्चारुमुखश्चारु
बाहुश्चतुर्भुजः चारुहस्तश्चारुनखश्चारुकेशःचमूपतिः

चिताबासीचरोचेलश्चेनाम्बरधरोच्युतः चारुहासश्चा
रुदंतःच्यवनःचंद्रवासितः चंद्रश्चंद्रकलानाथःचारु
पादःचतुर्गतिः चतुरात्माचतुर्थात्माचतुर्मूर्तिधरोधरः
चतुःसमुद्रशायनःचतुःसागरलेहनः चतुर्मुतिस्मृतः
शय्याचतुर्वीरवरोवरः चतुर्वेदमयोवेद्यःचार्वंगःचारु
भूषणा चतुर्वक्त्रःचतुर्वक्त्रप्रजितःपरमेश्वरः चल

ना·पं·
५·
50

च्छंदकशोभाढ्यः चलन्नूपुरराजितः चलदंभोदसदृ
शः चलदंभोजलोचनः चलदंभोदवदनः चलदंभो
दशोभितः चलत्कनककेयूरः चलत्कांचनकुंडलः
चलत्कनकशृंगाभः चलत्कनकशेखरः चक्रारूढः चा
रेशः चक्राराणिविभूषितः लक्ष्मीशांतो महादन्तो लक्ष्मी
पीतांबरः पविः छत्रीछत्रधरः छात्रः छिन्नमस्ताप्रियः पिता

छत्रछेदीछिन्नसुखेःछकारात्तारूपवान् लक्ष्मीकांतः
कांतिशुक्लोलक्ष्मीसाथकईश्वरः जगन्नाथोजगद्भर्ताजग
कर्त्ताजगत्स्थितिः जगत्त्रयकरोजेताजगतांपतिरुत्तमः
जगत्स्वामीजगद्धाताजगत्संहारकारकः जीवात्मापरमा
त्माचजगद्भूतिप्रदोभवः जगद्गुणीजगत्स्वस्थोजगदानं
ददायकः जगत्संतोषतुष्टात्माजगत्क्रोधदयान्वितः

ना॰पं॰ ५१ 51

जगद्धीत्रिकरोवेदोपासितोजगदीश्वरः जवीजवान्वितो
जारोजगदाडंबरप्रदः जगत्सेव्योजगत्प्रीतोजगादि
शोजगन्मयः जृंभनोजटिलोजीवोजेमारातिवरप्रदः
जामाताजलधेर्जेताजटाजूटमंडितः जितारिर्जयदो
जेयोजयश्रद्धीरतापनः लक्ष्मीकुचतटासीनोलक्ष्मीन
यनगोचरः फलवीजोत्कृतोफंडीफंडीशंढप्रतापनः

झंकारी झंकृतिक्लीं रवो झंकारिन्नूपुरः लक्ष्मीवरो म
हालक्ष्मीसेवितो देववंदितः ञंकारो ञारलो ञेशो ञव
र्णामृततद्रूपवान् लक्ष्मीसद्मः स्वर्गगतिर्लक्ष्मीवंद्यो विधुंतुदः
टंकारो टंकहस्तश्च दांतो टीकारकृज्जितः लक्ष्मीदेवो देव
देवो लक्ष्मीदाता कृपानिधिः ठकारो ठालको ठास्यो ठवर्ण
रूपमानिधिः लक्ष्मीविधुर्वितर्कोंतो वैनतेयध्वजो ध्वगः

ना॰पं
५२
52

उमरुद्रोमरेशानो उकारात्तरसंभृतः लक्ष्मीपतिः पी
वरांगो लक्ष्मीनायकनायकः ढकारवाच्यढकामेघोद
क्षासुरनिसूदनः लक्ष्मीजेताजयकरो लक्ष्मीशो लम्बसू
र्धजः लक्ष्मीजगत्स्थितिर्लक्ष्मीशौरिर्लक्ष्मीगदाधरः णांतो
णवर्णकोणेशो णवर्णमन्त्रसाधितः लक्ष्मीदामोदरो लक्ष्मी
प्राणो लक्ष्मीरथांगभृत् तस्मात्तस्मो महात्तत्वचितस्तारार्णं

मंडितः तोतुलस्तुलसीनाथस्तंत्रज्ञोमंत्रनायकः तपः
फलप्रदस्तापस्वरूपो तुल्यपराक्रमः तदिव्यरूपस्तादिगति
स्तपस्वीतापसप्रियः तुहिनांशुस्तुहिनजस्तुषारकरशो
भितः तुरीसेव्यस्तलाभस्तनकारान्तरमंडनः लक्ष्मीशंखो
द्भुयोलक्ष्मीनंदकीर्तिवर्णाश्रमः स्थविरःस्थूलगात्रश्चस्था
णुसेव्योपशाहकृत स्थालीरतप्रियोस्थूलःथकारेश्वरई

ना॰ पं
५३
53

ष्वरः लक्ष्मीजीवेश्वरो लक्ष्मीधरो लक्ष्मीनृसिंहकः दयावा
न्भूपतिर्दत्तोद्युतोदंभविवर्जितः दारिद्र्यहादुःखहर्ता दौर्भा
ग्यत्तयकृद्दयी दीनोदीनप्रभुर्दंभीदायितोदयवांछकः
दानकृद्दानफलदोदनुजेंद्रक्षयंकरः दारप्रियोदीर्घ
नखोडष्टाक्षरनिसूदनः देवदेवोयशोवंद्योदकारक
रमंडितः लक्ष्मीदयाकरोलक्ष्मीदेवोलक्ष्मीदयानिधिः

धनकृद्धनकृद्धन्यो धनदेशो धनप्रदः धृतिमान्धर्मवा
न्धर्मी धर्मकर्मविचक्षणः धर्माध्यक्षो धनाध्यक्षो धवलो
धीरवान्धनी धीरो धैर्यकरो धर्मदक्षो धनदपूजितः ल
क्ष्मीधनी महालक्ष्मीधवो लक्ष्मीमनोभवः नवीनोन्नतनो
नम्रो नटनो नाट्यतोषितः नगो नागो नगश्रेष्ठो नगम्यना
गमंडनः नृसिंहो नरवरो नंतो नरनारायणो नवः नग

ना॰पं॰ राजोनागपतिर्नागोनकध्वजोनलः नगारूढोनिम्नना
भिर्नंदिसेव्योनटेश्वरः नलिनाख्योन्नवंशोपिनायकोना
५८ गनायकः नर्मदातीरक्रीडाकृन्नलिनीपतिलोचनः न
54 रेशोन्नपञ्चास्यनागशायीनगोत्तमः नारायणोनिष्क
लंकोनवर्णाकृतिरात्मवान् लक्ष्मीनागोनगधरोलक्ष्मी
शायीन्त्रपवान् पुष्पप्रियापुष्पशय्याशयानःपुष्पशेखरः

पुण्यपत्न्याप्रपुत्रस्वपुण्योपुपुण्यपूजितः पूज्यः पवित्रं
परमंपरमेष्ठीपितामहः परंपदंपरंपुण्यंपरमात्माःपरा
त्परः पारावारस्तताभर्तापरमेशःपरंमहः पुण्यदःपु
ण्यकृत्स्वतःपुराणागमसुपूजितः पुराणपुरुषःपीनः
पीनवक्षोजितेंद्रियः पीतवासाःपीतमालःपीतवर्णः
परांकुशः पद्मगोविक्रान्तःपांथःपाथिकःपांथतोघदः

श्वैः पौरजनैः स्तुत्यः पवर्णो स्वर्णमंडनः लक्ष्मीपीतांब
रो लक्ष्मीपीतो लक्ष्मी परः परं फणं फणीवरः स्फीतः फल
हुत्फलदः फली फणीशय्याशयानश्च फकारामृतमंड
नः बालको बुद्धिमान्बोधो बंधुर्बांधव ईश्वरः लक्ष्मीबंधुर्म
हालक्ष्मीबांधवो लक्षणान्वितः भद्रप्रदो भास्वरांगो भास्क
रो भानुरव्ययः भानिधिर्भगवान्भीतो भीतिहाभयदायकः

लक्ष्मीभयहरोलक्ष्मीभयदोभयचातनः महेश्वरोमहा
मान्योमहामान्योमनोरमः मनोहारीमहाशांतोमहाते
जामनोजवः महोत्साहीमायवञ्चमायाधारीमनोन्मनः
मानदोस्मरज्ञानीचमानवेष्टफलप्रदः मदिरामोदसुदितो
मारमोहविवर्जितः लक्ष्मीमहोदयोलक्ष्मीमान्योलक्ष्मीमदा
लसः यशोदानंदनोयांतोयशस्वीयोधसैनिकः ॥

ना॰पं॰ यशोधरो यमो योगी योगिनां योगदायकः योगेंद्रो याग
मज्यश्च यादवो यादवेश्वरः यज्ञप्रीतो यज्ञनिधिर्याज्ञिको
५८ याज्ञिकप्रियः यज्ञा यज्ञा यशोजातो यकारात्तरद्रूपवान्
56 लक्ष्मीयज्ञकरो लक्ष्मीयाज्ञिको यज्ञसेवितः राजा रमापति
र्दैवो रामो राजा राजो रजः राजसो राविक्रुद्रामो रामानंदप्र
दायकः रेवतीरमणो राकापति सर्वकलाधरः

लक्ष्मीरामो महालक्ष्मीराजा लक्ष्मीत्रिविक्रमः लाक्षारुणो
लीनराज्ञो ललज्ञिको ललनापतिः लंकेशो लास्यको लांतो लं
बोदरश्रियःपरः लक्ष्मीलीनो लिवर्णाख्य लकाराकार ईश्वरः
वांतदो वीरसेनानीर्वराहविग्रहो विराट् विश्वर्वसुंधरा
नाथो वसुथो वसुधाधिपः वागीश्वरो वेणुहस्तो वेतालो विर
सो वियत् विद्वान्विशालनयनो विकारो विकृतिः पुमान्

ना॰पं॰
५२
57

वितर्की विनयी विद्याराजमान्यो विचारकः वाग्मी वानीर
मूलस्थो वाचाटो वीरनायकः लक्ष्मीवराहो वीरेशो लक्ष्मी
वीरो वनेचरः शंकरः श्रीधरः श्रीलः श्रमी शीतांशुशीतलः
शशमौलिशरण्यागः शंभुः शंखनिसूदनः शक्रः शत्रुद
यकरः शात्रुकालकरः शिवः लक्ष्मीशिवः श्रीपतिः श्रीवरो
लक्ष्मीशिवप्रदः षोडशस्वररूपश्च षोडशार्णविभूषणः

षडंगविद्यावेत्ताचषकारस्वरशजितः लक्ष्मीषडंगथा
रीचलक्ष्मीषोडशवर्णभृत् सुन्दरः स्वर्गवसतिः सर्वेशः
सर्वतोमुखः सप्तसप्तिः सदाचारः साधुः साधुजनप्रियः
सरसः सरलः सारः सर्वोत्सवविवर्धनः सप्तद्वीपवती
नाथः सप्तसागरनायकः सप्तस्वरमयः सप्तपातालतल
वासकः सात्विकः सत्वसंपन्नः समस्तदुरितापहः ॥

ना·पं·
५८
58

ससमरिपुविध्वंसी ससमक्षारघातनः ससमपातकध्वं
सी ससमसुखरवंदितः लक्ष्मीसनातनो लक्ष्मीसनकः
साधुपूजितः हरिर्हरो हरिर्हरो हाटकेशो हटापहः
हरिद्वर्णो हसितो हारी हरितलोचनः लक्ष्मीहरिहृ
षीकेशो लक्ष्मीहारधरोनघः लक्ष्मीक्षमापतिः क्षमाक्षमे
शः क्षारवर्णभाक् क्षणक्षत्लक्षणदानाय क्षमावान्क्षामितासुरः

लक्ष्मीत्वमाश्रुतोलक्ष्मीत्वमालक्ष्मीत्ववर्णमन् अनंतोनं
दिष्टज्यक्षप्यादिरादित्यसन्निभः इंदिरावल्लभोदेवईश्व
रःचोग्रत्रपवान् उप्मोज्वलोपिक्रणहाक्रकारोज्वलमा
त्वकः लवर्णावर्णोल्हकारपनवर्णसमान्वितः पेश्वर्यसहि
तश्चेशोतथोन्मत्तस्वरार्चितः अकारश्चैवमाकारस्वरूपःस्वर
भूषितः ॐ फ्रीं स्लौः फ्रीं श्रीं देवोलक्ष्मीनारायणःशिवः ॥

ना·पं· ५९

89

इतिमंत्रमयंनाम्नांसहस्रंतत्त्वमुत्तमं अकारादिक्षकारां
तविद्यानिलयमीश्वरि सर्वतीर्थमयंसर्वदेवदानवपू
जितम् अश्वमेधसहस्राणिवाजिपेयस्यकोटयः चां
द्रायणाघृतंदेविमहादानान्यनेकशः मंत्रनामसह
स्राणिकलांनार्हंतिषोडशीं अर्धरात्रेपठेद्वीरःशक्तिवत्तः
स्थितःशनैः सप्रेलक्ष्मीप्रियंदेवंवरदंसोपिपश्यति

महाचीनार्चनं कृत्वा पठेद्वीरार्चनं सकृत् शतवर्षसह
स्राणि श्यामायाः फलमाप्नुयात् एकवारं पठेद्यस्तु संश
ज्य गुरुसन्निधौ स भवेत्साधकः श्रीमान्परत्रशिदिवं व्रजेत्
पुण्यदं वरदं नित्यं तीर्थस्नापनमुत्तमं योगिनां योगदं पुण्यं
भोगिनां भोगवर्धनं रोगिनां रोगशमनं सर्वदुःखकृतना
शनम् वैष्णवानां प्रियतरं मुक्तानां परमार्थदम्

ना॰पं॰
६॰
6

अदातव्यमश्रोतव्यं प्रत्याशिष्याय पार्वति विना दानेन
शक्तीयान्न दद्याद्दक्षिणां विना दत्वा गृहीत्वा पुंभयोः
सिद्धिहानिर्भवेद्ध्रुवं इदं नाम सहस्रं तु लक्ष्मीनारायणस्य
ते तव भक्त्या मया ख्यातं गोपनीयं स्वयोनिवत् इति श्रीदे
वीरहस्ये तन्त्रे लक्ष्मीनारायणनामकाख्याने नामैकोन
चत्वारिंशः पटलः ३९ श्रीभैरव उवाच अथाहं तव स

वैस्वरहस्यं परमार्थदं मंत्रस्तोत्रं प्रवक्ष्यामि लक्ष्मीनाराय
णस्यते पंचमांगं महादेवि परमार्थप्रकाशकं चतुर्वे
दागमस्तत्वं भोगमोक्षैककारणं गुह्यंगुह्यतरं तत्वं मंत्र
राजस्य पार्वति कौलिकानां सदासेव्यं दानंदारसकारणं
अस्य श्रीलक्ष्मीनारायणस्तोत्रराजस्य शिव ऋषिः त्रिष्टु
प्छंदः श्रीलक्ष्मीनारायणो देवता श्रींबीजं ह्रींशक्तिः

ना॰पं॰ ८१

ॐ कीलकं श्रीभोगापवर्गसिद्ध्यर्थे लक्ष्मीनारायणस्तव
पाठे विनियोगः शर्वोन्दुवदनं पीतवाससं कमलास
नं लक्ष्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ।किरीटिनं
कुंडलहारमंडितं पद्मासनं श्याममुखं चतुर्भुजं पीतांबरं श
ङ्खगदाब्जचक्रपाणिं शरणं शरण्यं भजे विभुम् २ प्र
णवं यदि मानवो जपेद्धरिपादाम्बुजसेवनाकुलः

दज्ञांतकथामयातिनूनंपरमानंदमयोगतस्मयः ३
पराबीजंत्रयंयदिजपतिजंतर्जपभ्रविस्मराक्रांतःस्मा
र्तागमकुटिलमार्गोज्झितभयः भवेत्कौलेशानःसक
लरिपुदावाग्निजलदः स्मरस्त्रीभिःसार्धस्मरविटपिवाटी
षुरमते ४ त्रिबीजंयोमहामंत्रंजपेदानंदनिर्भरः भ्रा
नंदरूपोभवितालक्ष्मीनारायणप्रियः ५ विभूतिबी

ना॰पं
६२

जंमत्रराजतत्वंजपेद्धनांतेयदिकौलकेंद्रः सयातिदे
वासुरशजितांघ्रिःपरंपदंसर्वसुरैरलभ्यं ८ मावीज
मंतःपरमार्थतत्वंसम्नैकवूपंमनसाजपेद्यः सकामि
नीकामरणप्रवीणोभवेदरीणांत्रुरुदर्पहारी ९ रमा
वीजंनामाक्षरपदमयंमंत्रमुक्तंजपेद्योयंत्रात्रेहरिच
रणपद्मार्पितमनः भवेद्भ्रमन्मौलिस्फुरितमणिमालो

श्रुनिवहप्रभाभास्वत्पादः सधराणिधरेंद्रोविजयवा
न् ८ नारायणायेतिजपेन्मत्रंयोराज्ञोप्रभातेपरमा
र्घ्यबीजं स्ववैरिदावानलवारिवाहोभवेत्सगीर्भिर्गुरु
गर्वहारी ९ विश्वंजपेद्योप्रदिविश्वसारंविश्वंभर
ध्यानपरःप्रभाते साम्राज्यलक्ष्मीसरिश्वविजित्यलभे
दुविसर्गमतःपरान्तः १० चतुरक्षरसुहृन्नषोडशार

ना॰पं
९३
63

वक्षःपद्मांचितकाम्बराङ्घ्रिविंदौ कमलाक्षिनमीश्वरांनि
विष्टं परमानंदमयं भजाम्यनंतं ॥ इति मंत्रमयं पठेत्
स्तवं यो हृदि नारायणवल्लभं प्रभाते कमला विमला
शयस्य तस्य क्रान्तिशीलस्य वशीभविष्यवश्यं १२ इती
दं स्तोत्रमीशानि मूलमंत्रमयं परं नवभक्त्या मया व्याख्यातं
न चाख्येयं त्वशुद्धात्मभिः १२ पंचांगमिदमाद्यं तं लक्ष्मीना

रायणास्यते वर्णितं गोप्यमर्चायं गोपनीयं स्वयोनिव
त् श्रीदेव्युवाच भगवन्सर्वतत्वज्ञसर्वलोकहितेरत
क्रीतास्मि भवताचेनकथनेनास्यशंकर लक्ष्मीनाराय
णस्याद्यकृतार्थंचांगकृतमं मयाप्तःपरमानंदोदास्य
हं ते ब्रवीमि किं श्रीभैरवउवाच एतद्रहस्यमखिलं स
र्वतंत्रेषुगोपितं वेदानालोऽज्ञातंब्रह्मदेवितेकथितंम

ना॰पं॰ या देवानांदुर्लभंतत्वंपंचांगंवैस्नवार्चिते रहस्यंसर्व
लोकानांसर्वस्वंममपार्वति अप्रकाश्यमदातव्यम
६४ दातव्यंदुरात्मने देयंशिष्यायशांतायगुरुभक्तिरता
64 यच दानशीलायभक्तायकौलमार्गरतायच महावी
नपदस्थायवैस्नवायमहात्मने दत्वामुक्तिंलभेद्देवि
भक्तानांसिद्धिदायिनीम् इतीदंपरमंतत्वंतत्वातत्वंप

रात्परं गुह्यं गोप्यं गोपनीयं यत्नात्ता पारमेश्वरी इति
श्रीदेवीरहस्ये तंत्रे लक्ष्मीनारायणाख्यस्तवाख्यानेना
मचत्वारिंशः पटलः ४० समाप्तमेवेदं लक्ष्मीनाराय
णस्य पंचांगं चेति शिवम् ॥ श्रीनगरे १९५२